प्रत नं. २२८

Serving JinShasan
050365
gyanmandir@kobatirth.org

॥ श्रीजिनाय नमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

# ॥ श्रीसुदर्शनश्रेष्ठिचरित्रं ॥

(कर्त्ता–श्रीशुभशीलगणी)

( द्वितीयावृत्तिः )

छपावी प्रसिद्ध करनार–पण्डित हीरालाल हंसराज–( जामनगरवाळा )

संवत् १९९० | किंमत रु. ०–८–० | सने १९३४

श्रीजैनभास्करोदय प्रिन्टिंग प्रेसमां छाप्युं—जामनगर.

आ.श्री कैलाससागरसूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा
क्र. नं.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रत नं. २२८





॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीसुदर्शनश्रेष्ठिचरित्रं प्रारभ्यते ॥

(कर्ता–श्रीशुभशीलगणी) (द्वितीयावृत्तिः)

छपावी प्रसिद्ध करनार–पंडित श्रावक हीरालाल हंसराज–(जामनगरवाळा)

पालयन् दर्शनं शुद्धं । शीलं च मुक्तिसौख्यदं ॥ मुक्तिं गच्छति भव्यांगी । सुदर्शन इवाचिरात् ॥ १ ॥ तथाहि—अस्मिन्नेव जंबूद्वीपे दक्षीणदिग्विभूषणे भरतखंडे चंपाभिधा पुरी वर्तते. तत्र पुर्यामरिसिंहभूपपुत्रो दधिवाहनाख्यो राजा न्यायपुरस्सरं निजप्रजां पालयामास. तेन नृपेण निजकलाप्रयासेनानेकभूपसभा मध्ये राधावेधं विधाय अभयाभिधा राज्ञी परिणीताभूत्. तत्रैव पुर्यामेकोऽर्हद्दासाभिधः श्रेष्ठी परिवसतिस्म, तस्य गृहे संख्यातीतं द्रव्यं वर्तते, तेन लोकास्तं शक्रनिधानपतिं कुबेरमेव कथयंति. तस्य

आ श्री कैलाससागर सूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा
प्रा. क.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रेष्ठिनश्चार्हद्दास्यभिधा पत्नी वर्तते, सा चातीवरूपलावण्यालंकृता देवांगनेव परिभाति. एवं तौ द्वावपि दंपती परमसुखलीनो जैनधर्मतत्परौ नित्यं जिनपूजागुरुवंदनसुपात्रदानादिधर्मकार्याणि कुर्वंतौ निजसमयं गमयतःस्म. एवं परमसुखान्यनुभवंत्यास्तस्या अर्हद्दास्याः कियत्समयानंतरं गर्भे शुभस्वप्नसूचितः कोऽपि पुण्यशाली जीवः समुत्पन्नः. तस्य गर्भस्य प्रभावेण तस्याः शुभदोहदाः समुत्पन्नाः. तेन सा सर्वदा सविशेषं श्रीवीतरागपूजनगुरुवंदनसुपात्रदानादि कर्तुं प्रवृत्ता. क्रमेण तया गर्भवत्याऽर्हद्दास्या शुभसमये एको महातेजस्वी चंद्र इवाह्लादप्रदः सोम्यमूर्ति सुतः प्रसूतः. तज्जन्मप्रमुदितः श्रेष्ठी विविधदानैर्याचकसमूहान् प्रीणयामास, पौरबालकांश्च मिष्टान्नदानादिना संतोषयमास, प्रतिजिनमंदिरं जिनप्रतिमानां स्नात्रादिमहोत्सवपूर्वकं पूजां कारयामास, साधर्मिकांश्च वस्त्रपात्रादिप्रभावनाभिराह्लादयामास. ततः शुभदिवसे सकलकुटुंबसाक्षिकं तस्य तेजस्विनः पुत्रस्य सुदर्शन इतिनाम श्रेष्ठिना विहितं. क्रमेण वृद्धिं प्राप्नुवन् स सुदर्शनकुमारो बालक्रीडां कुर्वन्, प्रस्खलन्. जल्पंश्च निजपितरौ प्रमोदयामास. एवं बाल्यकालमुल्लंघितः स श्रेष्ठिना कलाभ्यसकृते पाठशालायां प्रेषितः. तत्राप्यध्यापकं प्रमोदयन् स्वल्पेनैव



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रयासेन स निखिलकलाकलापकलितो जज्ञे. ततोऽसौ निजमातापित्रोराज्ञयोपाश्रये गत्वा विनयेन जैनमुनिगणेभ्यः शास्त्राभ्यासं कर्तुं प्रवृत्तः. क्रमेण च स निखिलशास्त्राब्धिपारंगतो बभूव, यतः—रूपयौवनसंपन्ना । विशालकुलसंभवाः ॥ विद्याहिना न शोभंते । निर्गंधा इव किंशुकाः ॥ १ ॥ पंडितेषु गुणाः सर्वे । मूर्खे दोषाश्च केवलाः ॥ तस्मान्मूर्खसहस्रेभ्यः । प्राज्ञ एकः किलोत्तमः ॥ २ ॥ तत क्रमेण संप्राप्तयौवनः स सुदर्शनकुमारो निजरूपलावण्यातिशयेन मदनबाणापहतनां नगरस्त्रीणां मनास्यांदोलयामास. ततोऽर्हद्दासः श्रेष्ठी तं निजपुत्रं सुदर्शनं यौवनोन्मुखं संभाव्य तद्विवाहकरणोत्सुको जज्ञे. ततस्तेन रूपलावण्यादिवर्यगुणोपेतया मनोरमाख्यया महेभ्यपुत्र्या सह तस्य निजपुत्रस्य महोत्सवपूर्वकं विवाहो विहितः. तथा पत्न्या समं विविधसुखान्यनुभवन् स सुदर्शनोऽपि जैनधर्मदृढमानसो नित्यं शुद्धं सम्यक्त्वं पालयति. यतः—मूलं बोधिद्रुमस्यैतद् । द्वारं पुण्यपुरस्य च ॥ पीठं निर्वाणहर्म्यस्य । निधानं सर्वसंपदां ॥ १ ॥ गुणानामेव ह्याधारो । रत्नानामिव सागरः ॥ पात्रं चारित्रवित्तस्य । सम्यक्त्वं श्लाघ्यते न कैः ॥ २ ॥ ततः कियत्कालानंतरं सोऽर्हद्दासः श्रेष्ठी तं निजपुत्रं सुदर्शनं सर्वगुणसंपन्नं विज्ञाय निश्चिंतो नि-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सुदर्शन चरित्रं ॥ ४ ॥

खिलं गृहभारं तस्मै समर्प्य स्वयं सद्गुरुसंनिधौ संयमं जग्राह. अथ स सुदर्शनश्रेष्ठ्यपि निजनिर्मलगुणगणैर्लोकान् प्रीणयन् निजपितुरपि सविशेषं राजमान्यो बभूव. यतः—कुंभः परिमितमंतः। पिबति पयः कुंभसंभवोंऽभोधिं ॥ अतिरिच्यते सुजन्मा। कश्चिज्जनकान्निजेन चरितेन ॥ १ ॥ क्रमेण तस्य सुदर्शनश्रेष्ठिन एकेन कपिलाभिधेन द्विजेन सह परमं सौहार्दं बभूव. स च द्विजो वेदादिशास्त्रपारंगतो नृपेण भृशं सन्मानितः नगरपुरोधा अभूत्. स च पुरोधास्तस्य सुदर्शनश्रेष्ठिनो गुणगणाकृष्ट इव नित्यं तत्पार्श्वे एव स्थितो विशेषेण प्रायो निजसमयं ज्ञानगोष्ठ्या निर्गमयति. एवं निजस्वामिनो गृहतो बहिरेव विशेषस्थितिं विज्ञाय तस्य प्रिया कपिलैकदा तं पप्रच्छ, स्वामिन्! सर्वमपि दिनं कुत्र स्थिता यूयं निर्गमयथ? तत् श्रुत्वा कपिलेन प्रोक्तं, हे प्रिये! अहं नित्यं प्रायो मदीयसुहृदुत्तमस्य सुदर्शनश्रेष्ठिनोऽग्रे स्थितो ज्ञानगोष्ठ्या निजसमयं निर्गमयामि. तदा कपिलया पृष्टं, स्वामिन्! कोऽसौ गुणगणालयः सुदर्शनः श्रेष्ठी? येन सह भवतामीदृशी मैत्री जातास्ति? तत् श्रुत्वा स मुग्धः कपिलद्विजोऽवदत्, हे प्रिये! किं त्वया स सुदर्शनः श्रेष्ठी ज्ञातो वा दृष्टो नास्ति? स तु रूपेण कंदर्पमपि जयति, बुध्ध्या वाचस्पति-

मूल ॥ ४ ॥

P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मपि पराकरोति, तेजसा सूर्यमपि तिरस्करोति, शांतस्वभावेन चंद्रमपि लज्जयति, विशेषतः किं वच्मि? निजशीलगुणेन स सर्वसज्जनशिरोमणिरस्ति. एवं विधात्रा कस्मिंश्चिन्निवृत्तिभाजि दिने स सर्वगुणसंपन्नो निर्मितोऽस्ति. एवं तद्गुणगणश्रवणेनाविर्भूतमदनाभिलाषापि सा कपिला निजस्त्रीचरित्रचातुर्येण तामभिलाषां शमयंती निजस्वामिनं प्रोवाच. भो स्वामिन्! एवं गुणगणालंकृतस्य सज्जनोत्तमस्य तस्य सुदर्शनश्रेष्ठिनो भवतां मैत्री खलु प्रशस्यैव. इत्युक्त्वा सा गृहकार्येषु प्रवृत्ता, परं तस्याश्चित्तं तस्य सुदर्शनश्रेष्ठिनः संगप्राप्त्यर्थं मदनसायकबाणप्रहारैः सविशेषं विह्वलीभूतं गृहकार्येषु न लगति, यतः—स्मितेन भावेन मदेन लज्जया। पराङ्मुखैरर्धकटाक्षवीक्षितैः॥ वचोभिरीर्ष्याकलहेन लीलया। स्वानंगतामाविर्भावयंति याः॥१॥ एवं सुदर्शनश्रेष्ठिसंगं ध्यायंत्यां तस्यामन्येद्युः कपिलः कस्मैचित्कार्याय भूपतिप्रेषितो ग्रामांतरं गतः, अथ लब्धप्रस्तावा सा कपिला निजकुबुद्धिप्रेरिता सुदर्शनश्रेष्ठिनो गृहे गत्वा तदग्रे प्रोवाच, भो सुदर्शन। त्वदीयः सुहृदद्य ज्वरेण पीडितोऽस्ति, तेन विह्वलीभूतमानसः स त्वां निजपरमसुहृदं निलितुमिच्छति, तवागमनेन तस्य हृदि परमा शांतिर्भविष्यति, तेन तत्प्रेषिताहं त्वामाका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रयितुं समागतास्मि. अतस्त्वमविलंबं तत्र समागच्छ? ज्वराभिभूतं तं त्वदीयमित्रं च सांत्वय? तत् श्रुत्वा सरलस्वभावः सुदर्शनः प्राह, अहो, मम मित्रस्य ज्वरातूरस्य विह्वलत्वं मया ज्ञातं नाभूत, सुष्टु कृतं त्वया यदहं तत्स्वरूपं ज्ञापितः. अथ त्वं याहि? अहमधुनैव तव पश्चात् सर्वकाकार्यं परिहृत्यापि समागच्छामि. इत्युक्त्वा तां विसर्ज्य स निजमित्रपार्श्वे गंतुमुत्सुकीभूय चलितः. अथ कपिलापि तं सुदर्शनं दृष्ट्वाऽपरमनंगमप्यंगधारिणं मत्वा भृशं कामातुरा निजप्रयासं च सफलं मन्यमाना द्रुतं द्रुतं निजगृहे समागत्य शय्याद्यासनानि प्रगुणीचकार. इतः स सुदर्शनः श्रेष्ठ्यपि निजपरममित्रमिलनायोत्सुकीभूतः सन् तदीयगृहमध्ये प्रविष्टः. यथा यथा स गृहमध्ये प्रविशति, तथा तथा सा गृहद्वाराणि पिधत्तेस्म. ततो गृहांतः समागतं तं सुदर्शनंप्रति कामाग्नितप्ता सा कपिला कटाक्षशतानि विक्षिपंती, नानाविधहावभावान् दर्शयंती, परमप्रेमपयःसिक्तेव प्रस्वेदक्लिन्ना. प्रकंपितांगी समन्मनाक्षरं जजल्प, हे स्वामिन्! भूरिकालादहं त्वत्संगमं वांछंत्यस्मि, संप्रति मदनतापसंतप्तां मां निजभुजोर्मिभिः संवेष्ट्य प्रेमपयः पूरैर्यूयं सिंचत? इथं कमलकोमला शय्या, त्वदीयसंगमातुरमिदं मे शरीरं, च भोगोपभोगयोग्यं सकलमपि व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तुजातं संप्रति त्वदायत्तमेव विद्यते, अतस्त्वं स्वेच्छया मया सह भोगान् भुंक्ष्व ? एवंविधांस्तस्या आलापान् श्रुत्वा प्रत्युत्पन्नमतिः स सुदर्शनो निजशीलरक्षार्थं, तस्याश्च कामविकारापनयनार्थं जगौ, भो सुंदरि ! मयि प्रेमरसभरनिर्भरः सर्वोऽपि तेऽभिलाषो मया ज्ञातः. मनसि चापि सुष्टुतया संगृहीतः. परं त्वं मयि रागकरणे नूनं वंचितासि, यतोऽहं तु नपुंसकोऽस्मि, त्वया चेदं मम नपुंसकत्वं कस्याप्यग्रे न वक्तव्यं. एवंविधानि सुदर्शनवचनानि निशम्य सा वीलक्षीभूता, प्रशांतमदनविकारा पश्चात्तापं कुर्वती तं प्राह. भो सुदर्शन ! अथ त्वयापि मदीयेयं कुचेष्टा कस्याप्यग्रे न वक्तव्या. एवं निजफालच्युता व्याघ्रीव गतानंगविकारा लज्जया नम्रीभूतानना सा तं सुदर्शनं द्रुतं ततो विससर्ज. सुदर्शनोऽपि कथंचिद् व्याधपाशनिर्मुक्तहरिणवदविलंबेन गतिवेगमादृत्य निजगृहे समाजगाम. ततस्तेनाभिग्रहो जगृहे, अथ मयवमपरीक्ष्य यथातथा कस्यापि गृहे न गंतव्यं. एवं सुदृढमनःपरिणामोऽसौ सुदर्शन श्रेष्ठी निजशीलं रक्षयामास. अथान्यदा वसंततुसमयः समाययौ. आम्रवृक्षोपरि नवपल्लवोपेतं मंजरीव्रजं निरीक्ष्योन्मत्तीभूताः कोकिला निजपंचमस्वरशस्त्रैर्विरहिजनानां चेतांसि विदारयामासुः. प्रफुल्लनवमालतीपुष्पपरिमललोलुपा



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मधुकरा निजगुंजारवैर्जनमनांसि मोदयामासुः. अथोद्यानपालनिवेदितां तामुपवनशाभां परिभोक्तुं पृथ्वीपतिरपि पौरपरिवारपरिवृतो वनमध्ये ययौ. अभयामहाराज्ञ्यपि तया पुरोहितपत्न्या कपिलया सह यानारूढा नृपादिपरिवारेण सह तत्रोद्याने गंतुं प्रवृत्ता. तदा तस्य सुदर्शनश्रेष्ठिनः प्रिया मनोरमापि निजषड्पुत्रपरिवारयुता रथारूढा तस्मिन् वसंतोत्सवे वनंप्रति गमनं चकार. सुदर्शनोऽपि निजपरिजनमित्रादिपरिवारयुतोऽश्वारूढस्तत्र चलतिस्म. ततो मार्गे पुत्रगणोपेतां रथारूढां सुदर्शनपत्नीं तां मनोरमां निरीक्ष्य कपिलाऽभयां राज्ञींप्रति प्राह, हे सखि ! कस्येयं पत्नी ? कस्य चायं पुत्रपरिवारः ? तत् श्रुत्वाऽभयया प्रोक्तं, अरे ! मुग्धे ! किं त्वमेनां ललनां नोपलक्षसि ? इयं हि तव भर्तुः परमसुहृदः सुदर्शनश्रेष्ठिनो मनोरमाभिधा प्रियास्ति, एषः सर्वः पुत्रपरिवारोऽपि तस्यैव विद्यते. तत् श्रुत्वाश्चर्यनिमग्ना कपिला क्षणं तूष्णीभूयावदत्, सखि ! स सुदर्शनस्तु नपुंसकोऽस्ति, मयैषः पराक्षितोस्ति, इत्युक्त्वा तया स्त्रीस्वभावतो गुप्तोऽपि सकलो निजवृत्तांतस्तस्यै स्वप्रियसख्यै अभयायै कथितः. तत् श्रुत्वा सहास्याऽभया दत्ततालं तामवादत्, अरे ! मुग्धे ! त्वं तेन धूर्तेन वंचिता, अरेरे ! हस्तागतोपि स वेहधारी कामदेवस्त्वया

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भोक्तुमशक्योऽभूत ! नूनं स्त्रीकलाऽनभिज्ञया त्वया जगति स्त्रीजातिर्लज्जितैव. पुरुषवशीकरणकलाकौशल्यकलिताः पाखंडपांडित्यमंडिताः स्त्रियस्तु योगनिष्ठं महामुनिवरमपि चलचित्तं कर्तुं समर्था भवंति, किं बहुना ? निजकोमलवचोहावभावकटाक्षविक्षेपादिसततजलप्रवाहैः पाषाणमपि ता द्रावयंति, तर्हि सुदर्शनसदृशपुरुषस्य तु का वार्ता ? एवं निजसख्या अभयया व्यंगवचनैर्भृशमाक्षिप्ता लज्जिता कपिला तामवदत्, भो सखि ! यद्येवं त्वं निजचातुर्यगर्वितासि, तर्हि तेन सुदर्शनेन सह विलासं कुर्वंतं निजात्मानं मे दर्शय ? यथाहमपि तव चातुर्यं स्त्रीकलापरिपूर्णतां च जानामि. तत् श्रुत्वा गर्वारूढयाऽभययापि तत्प्रतिपन्नं. तत उद्याने वसंतोत्सवं विधाय भूपाद्याः सर्वेऽपि पौरगणाः सायं नगरमध्ये समाययुः. कपिलापि निजगृहं गता अभया राज्ञ्यपि निजावासं प्राप्ता, अथ सुदर्शनेन सह विलासकरणार्थं कपिलाग्रे स्वयं प्रतिज्ञातं वचः स्मरंती साऽभयाराज्ञी ततः प्रभृति कमप्युचितमवसरं विलोकयंती चिंतातुरा बभूव. अथैवं तां राज्ञीं नित्यं चिंतातुरां वीक्ष्य तस्याः पंडिताभिधया सख्या प्रोक्तं, भो सखि ! सांप्रतं त्वं नित्यं म्लानानना किं दृश्यसे ? तव चेतसि का चिंता विद्यते ? तत् श्रुत्वाऽभयया सकलमपि निजस्वरूपं त-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्यै निवेदितं. तन्निशम्य पंडितावदत्, भो सखि! त्वयैषा प्रतिज्ञा नूनमस्थाने कृता. यतो मेरुशिखरमपि कदाचिच्चलेत्, परं स सुदर्शनश्रेष्ठी तु शीलव्रतात् केनापि चालयितुं न शक्यः, असौ परनारीसहोदरा-भूतोऽखंडं निजशीलव्रतं पालयति. तत् श्रुत्वा अभयावदत्, भो सखि! केनाप्युपायेन त्वं केवलं तमत्र मत्पार्श्वे समानय? पश्चात्सर्वमप्यहं विलोकयिष्यामि. तदा पंडितया प्रोक्तं, अथ पर्वदिने केनापि च्छ-लेनाहं तमत्र तव पार्श्वे आनयिष्यामि. अथैवं कियद्दिनानंतरं कौमुदीमहोत्सवः समागतः, तदा राजा नगरमध्ये पटहवादनपूर्वं सांतःपुरः पौरलोकयुतश्चोद्याने गतः. तदा पंडिताप्रेरिताऽभयाराज्ञी शिरोऽर्ति-मिषं विधाय निजावासे एव स्थिता. सुदर्शनश्रेष्ठी च तस्मिन् दिवसे चतुर्दशीपर्व मत्वा नृपादेशं संप्रा-प्य क्वापि देवकुले कायोत्सर्गध्यानेन तस्थौ. अथ सा विचक्षणा पंडितापि लब्धावसरा राज्ञ्याः पूजनार्थं सप्रभावामेकां यक्षप्रतिमां शिबिकायामारोप्य वाद्यवादनपूर्वकमंतःपुरमध्ये समानयामास. पुनस्तां प्रति-मां बहिरानयत्, पुनश्चांतःपुरे समानयत्. एवं द्वित्रिवारं कुर्वती सा सौविदल्लादीनां विश्वासमुत्पादयामा-स. प्रांते सा कायोत्सर्गस्थं तं सुदर्शनश्रेष्ठिनं देवकुलात्समुत्पाट्य, शिबिकायां च संस्थाप्य यक्षप्रतिमा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मिषेण तेषां सौविदल्लादीनां वंचनं विधायांतःपुरे समानयत्. सुदर्शनस्तु समापतितमुपसर्गं विज्ञाय तत्रापि मौनेन कायोत्सर्गस्थ एव तस्थौ. ततः सा कामविह्वलाऽभयाराज्ञी तं मन्मनाक्षरैर्जजल्प, भो सुदर्शन ! अहं त्वदीयरूपगुणादिभिर्मोहितास्मि, अतो मया सह भोगान् भुंक्त्वा मदीयं कामाज्वरं सांत्वय? एवं तया भूरिचाटुवचनैर्हावभावपुरस्सरं प्रार्थ्यमानोऽपि स सुदर्शनः किमपि न जजल्प. एवं बहुविधप्रार्थनयापि किमप्यजल्पंतं तं विलोक्य कोपकरालनयना सा तं प्राह, रे ! दुष्ट ! मयैवं भूरिशः प्रार्थ्यमानोऽपि यदि मम सन्मुखमपि नावलोकयसि, तदाहं नूनं तव प्राणान् गृहीष्यामि. एवं तया भाषितोऽपि सदृढतरमनाः साहसमवलंब्य निजशीलरक्षणार्थं न किंचिदप्यवदत्. अथातीवविलक्षीभूतया कोपाकुलचित्तया तया पूत्कारः कृतः, भो भो लोकाः ! धावत ? धावत ? अयं दुष्टः पापात्मा मदीयं शीलं भंक्तुमत्रागतोऽस्ति. एवं राज्ञ्या कृतं पूत्कारं निशम्य द्रुतमेव तत्र केचिद्राजपुरुषाः समागताः, तैश्च गृहीत्वा स श्रेष्ठी नृपपार्श्वे समानीतः, कथितं चायं दुष्टो राज्याः शीलभंगार्थं कामविह्वलीभूतो भवतामंतःपुरे प्रविष्टोऽभूत्. तत् श्रुत्वाऽऽश्चर्यं प्राप्तो नृपः सुदर्शनमपृच्छत्, भो सुदर्शन ! त्वं किमर्थं कथं च मदीयांतः-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुरमध्ये प्रविष्टः ? तत् श्रुत्वा सुदर्शनस्तु निजपौषधव्रतभंगभयान्न किंचिदप्यवदत्. तदा क्रुधेन राज्ञा तेभ्यो निजपुरुषेभ्यः समादिष्टं, यदयं परदारलंपटः पापी शूलायामारोप्यतां ? एवं नृपादिष्टास्ते राजपुरुषास्तं सुदर्शनश्रेष्ठिनं पुरमध्ये भ्रामयित्वा शूलारोपणार्थं वधस्थाने निन्युः. इतो मनोरमा निजभर्तुर्विडंबनां विज्ञाय स्वचेतसीति व्यचिंतयत्, नूनं यदि सूर्योऽपि कदाचित्पश्चिमायां दिशि समुदयेत्तथापि मम भर्तरि एवंविधो दोषलेशोऽपि न संभवेत्. केनापि पूर्वकृतदुष्कर्मोदयेन कस्यापि मायाजालपतितस्य मदीयभर्तुरयं कलंकः समापतितः संभाव्यते. अतो महासंकटे पतितया मया संप्रति धर्मस्यैव शरणमंगीकर्तव्यं, येनायं विघ्नः स्वयमेव विलीनो भविष्यति, इति ध्यात्वा तया कायोत्सर्गः स्वीकृतः, ध्यातं च यदा मदीयभर्तुरयं विघ्नो दूरं यास्यति, तदैव मया कायोत्सर्गः पारयितव्यः. अथ यावत्ते राजपुरुषास्तं सुदर्शनश्रेष्ठिनं शूलायामारोपयितुं प्रवृत्ता स्तावत्तस्याखंडव्रतप्रभावेण संतुष्टा शासनदेवी तां शूलां स्वर्णसिंहासनरूपामेव व्यधात्. तदाश्चर्यं प्रातैस्तैर्नृपपुरुषैः स वृत्तांतो राज्ञे ज्ञापितः, तत् श्रुत्वा निजहृदि चमत्कृतो राजापि तत्रागतः, सर्वे पौरा अपि तत्रागत्य मिलिताः. तदा शासनदेव्या प्रकटीभूय तस्या

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अभयाराज्ञ्याः सकलमपि दुश्चेष्टितं सर्वलोकसमक्षं राज्ञे प्रकटीकृतं, कथितं चाथ यः कोऽपि शीलधर्मपरयोरेतयोर्दंपत्योर्विरुद्धं चिंतयिष्यति, तमहं स्वयमेव देहांतशिक्षां प्रापयिष्यामि, इत्युक्त्वा शासनदेवी तिरोभूता. अथ राजा निजापराधं क्षमयित्वा सपौरो महोत्सवेन तं तदीयगेहे प्रापयामास. एवं धर्मप्रभावेण कुशलक्षेमं निजस्वामिनं गृहे समागतं निरीक्ष्य मनोरमयापि कायोत्सर्गः पारितः. ततो राजा तां निजराज्ञीमभयां पंडितां कपिलां चापि स्वदेशान्निष्कासयामास. क्रमात्तास्त्रयोऽपि मृत्वा दुर्गतिं प्राप्ताः. ततो वैराग्यवासितहृदयः स सुदर्शनः श्रेष्ठी संयममंगीकृत्य तीव्रतपःप्रभावेण प्राप्तकेवलज्ञानः सकलकर्मक्षयं विधाय मुक्तिमगात्. मनोरमापि क्रमाद् गृहीतसंयमा क्षीणसर्वकर्मपुंजा मुक्तिं गता, ॥ इति श्रीसुदर्शनश्रेष्ठि चरित्रं समाप्तं ॥ श्रीरस्तु ॥ आ चरित्र श्रीशुभशीलगणीजीए रचेला कथाकोष नामना ग्रंथमांथी उद्धरीने तेनी मूलभाषामां बनता प्रयासे सुधारो वधारो करी जामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयने माटे पोताना श्रीजैनभास्करोदयप्रेसमां छापी प्रसिद्ध कर्युं.

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीसुदर्शनश्रेष्ठिचरित्रं समाप्तम् ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust